
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2432 विषय दर्शन


नाव रागमालारंभ पत्रम्

लेखक/लिपीकार मीर गोविंद

पृष्ठ 48 काळ .... पूर्ण/अपूर्ण

M2432

श्रीरागमाळारंभपत्रम्॥श्रीरस्तु



॥श्री गणपतयेनमः॥श्री शिवस्वरूपगुरुभ्यो नमः॥ शुद्धछायालगाभिन्नो मूर्छनाग्रामतान
वित्। सतानरंजकंगीतं योगायतिसगायनः॥१॥ एकलोयमलोवृंदगायश्चेति सत्रिधा। एकएवे
तियोगायेद्सावेकलगायनः॥२॥ सद्वितीयो यमलकः सवृंदीवृंदगायनः॥ मातृवाद्कसंघातो
वृंदमित्यभिधीयते॥३॥ इतिगायनः॥ गायनस्यगुणादोषानादस्थानश्रुतिस्वराः॥ ग्रामश्च
मूर्छनास्तानाः प्रस्तारस्तस्यसंख्यका॥४॥ नष्टोदिष्टेततोवर्णालंकार गमकास्तत॥ स्था
याश्चालिप्तिभेदाश्च गगस्यस्थापनंततः॥५॥ रागलक्ष्मस्वरूपाणि प्रबंधलक्षणानिच।
प्रबंधगुणदोषाश्च तथावाग्गेयकारकः॥६॥ इत्युद्दिष्टाः क्रमात्तेषांप्रवक्ष्याम्यथलक्षणं।
सुघरश्च सुशारीरो ग्रहमोक्षविचक्षणः॥७॥ विविधालप्तिनिपुणः श्रावकः सांप्रदायि
कः॥ आयत्तकंठवान्शुद्धछायालगविशेषवित्॥८॥ जितश्रमः सावधानोगायनानां

पथा१ सहो२

वि

गुणादत्रा। तत्तत्स्थानं योग्यं घटयन्सुघटः स्मृतः ।९। तारमाधुर्यपुष्टिश्चस्निग्धत्वं उ
ध्वनि कांतिता। तत्सुशारीरमित्युक्तं शारीरेणोद्भवात् ।११। गीतारंभसमाप्त्योश्च लय
तालग्रहानुगः। गीतनिर्वाहकः प्रोक्तो ग्रहमोक्षविचक्षणः ।११।२। आलापरूपकालाप
भंजन्यालपनेषु च। विविधालप्तिनिपुणस्तत्तदालापकोविदः ।१३। दूरात्तु श्रूयते यस्मा
त्तद्ध्वनिः श्रावक उच्यते ।५। गुरुशिँतानुसारेण साधकः सांप्रदायिकः ।२३६। स्वाधीन
ध्वनिप्राचुर्यः स्मृतश्चायत्तकंठवान् ।७। शुद्धछायालगेष्वेव हितताहित विचारवान् ।१४। म
तिमान्यः शुद्धादिछायालगविशेषवित् ।८। अभ्यासतत्परो धीमान्त्रिसंध्यं च जितश्रमः।
।१५९। स्वरोधिको विहीनो वा विरक्तः सावधानकः ।१०। इति गायनगुणाः ।। अव्यवस्थि
तस्थीत्कारि कपिलाव्यक्तकोकूजाः । वितालो दुष्टविरसो व्यंगांगः सानुनासिकः । इत्येते

दशमादोषाः स्युः प्रसिद्धा गायनादिषु। स्थानभ्रष्टसमप्रामु मराक्रमस्य व्यवस्थितः॥१॥
मुकुः सीत्कारतां कुर्वन्सीत्कारी कथितो बुधैः।२। कपिलः स्तुयो गायेत्स्वरान्सूनाधिक
श्रुतीन्।३। गद्गदध्वनिरव्यक्तवर्णस्त्वव्यक्त उच्यते।४। छागवद्वाहनि कुर्वन्नुक्तो धमगाय
कः।५। कालस्थानविहीनोयो विलालस्तालविच्युतः।६। उद्घुष्टोविरसोद्वेषः काकवक्त्र २४
रशब्दभाक्।७। विरसोनीरसोवर्ज्यस्वरगानादपस्वरः।८। गलगल्लशिरोनेत्रकरादीनां
विकारतः। गायन्व्यंगांगकश्चास्याद्धमाधमगायनः।९। पद्मानासिकयागायन्
गीयते सानुनासिकः।१०। इतिगायनदोषाः॥ मनोयुंक्तेविवक्षात्मा सा हंति वह्निंमनोनलः।
प्रेरयस्य निलंप्राणोनिलस्थोर्ध्वक्रमाच्चरन्।१। नाभिहृत्कंठशीर्षास्येष्वाविर्भावयं
ति ध्वनिं। ध्वनिस्तु नदधानो हि स द्विना दोष्ट निस्मृतः।२। अतिसूक्ष्मः सूक्ष्मपुष्टा

वतिपुष्टश्चक्रुत्रिमः पंचारव्याइतिधत्तेसौ चतुर्थो व्यवहारतः ॥३॥ अतिमंद्रो नाभिदेशे मं
द्रो हृदि गले पुनः ॥ मध्यस्तारस्तु मूर्द्धि स्याद्द्विगुणश्चोत्तरोत्तरः ॥४॥ यंत्रेनुमंत्रैद्रुस्थानं
स्यादुद्गायकेत त्राक्यतः ॥ मंद्रादि त्रितयंस्थानं व्यवहारेभिधीयते ॥५॥ हितवीनादभेदस्य
तिर्यक्सछिद्रनाडिकाः ॥ द्वाविंशतिः प्रतिस्थानं सोपानाकारवक्रमात् ॥६॥ वायुपूरणात
स्तासु तावस्वस्त्वत्तरोत्तरं ॥ भवंत्युच्चोच्चतरताः श्रुतयः श्राव्यमात्रतः ॥७॥ रागादिव्य
वहाराय तासु सप्तस्वराः स्थिताः ॥ षड्जश्च ऋषभश्चैव गांधारो मध्यमस्ततः ॥ पंचमो
धैवतश्चाथ निषादश्चेत्यनुक्रमात् ॥ तेषां संज्ञाः सरिगमपधनीत्यपरा मताः ॥८॥ विरा
चकीक श्रुतिषु च पादरयां श्रुतौ ततः ॥ सप्तदश्यां च विंश्यां च द्वाविंश्यां च श्रुतौ क्रमात् ॥
॥ षड्जादीनां स्थितिः प्रोक्ता ॥ अपमाभरतादिभिः ॥ असपाः पूर्वपूर्वस्मात्संचरं स्युत्तरोत्तरं ॥१०॥

त्रिस्त्रिर्गतीस्तत्रत्येकंयांतिगश्च चतुर्गतिः। यद्यद्रागोपयोगं स्यात्तत्तद्दिक्षागतिर्भवेत्॥११॥
गन्योर्गती द्वितीयेवांतरकाकलिनौ स्मृतौ। पंचम्यष्टादशीषष्ठीतथान्ये कोनविंशतिः॥१२
चतस्रः श्रुतयश्चैता रागाद्यैरप्रयोजकाः। शेषा अष्टादशैवस्युः श्रुतयः स्वरबोधकाः॥१३॥
न्यूनाधिकेकगतिका मंद्रतारस्वरा यदि। नरागहानिकाः सर्वस्पष्टता मध्यसप्तके॥१४॥ चतु
र्विधाः स्वरावादी संवादी च विवाद्यपि। अनुवादीतिवादीतु प्रयोगबहुलः स्वरः॥१५॥ अंश
स्थायीतिपर्यायोरागोत्पादनहेतुकः। श्रुतयो द्वादशाष्टौ वा ययोरंतरगोचराः॥१६॥ मि
थः संवादिनौ तौ स्तो गत्यादेश्च विभागतः। एकश्रुत्यंतरौ यौ कौ तौ मिथश्च विवादिनौ॥१७
शेषाणामनुवादित्वं ज्ञेयमन्वर्थतः क्रमात्। क्वचिदंशः क्वचिन्न्यासः क्वचित्सागः
स्वरस्तथा॥१८ तत्तच्छ्रुत्यानुसारेणरागेषु ग्रहणीं नयेत्। गीतादिनियमस्मात्रस्वरो ३

ग्रहस्तीरितः।१९। प्रयोगे बहुलो ज्ञाः स्यान्न्यासोगी तस्समाप्तिकृत्। विदारीवान
पन्यासो विदारी छेदकृन्मुकुः।२०। सर्वत्र रागतस्त्वेते स्वरभेदा भवंति हि। ४१ षड्जः
सर्वेषु रागेषु ग्रहो हि निधपादयः। वर्णमात्राः प्रयोज्याय रक्त्याधिक्यान्नतेस्वराः ४२
अंशोषाम् छिनाः प्रोक्ताः षड्जस्थाने मुनीश्वरैः। षड्जस्थानस्थितैन्योद्यैरजन्याद्या इ
तिस्मृताः ४४। हतिः श्रुतिस्तलो लग्न जातो नुरणन ध्वनि। भावी दीप्तः श्रोतृचित्तस्य
तो रंजयतिस्वरः ४५ स्वराणां निचयो ग्रामो मूर्छनादिसमाश्रितः। भरतेनोदितौ शास्त्रे
ग्रामौ द्वौ षड्जमध्यमौ ४६ षड्जग्रामः पंचमेतु सप्तदश्यां श्रुतौ स्थिते। स्वरेस्मिन्पंचमे
किंतु षोडश्यां श्रुतिमाश्रिते ४७ तदैव मध्यमग्रामः सोत्ररागे न दृश्यते। षड्जग्रामा
श्रितान्ग्रा[गा][illegible]न्सर्वे गायंति गायकाः ४८ तस्मान्मुख्यतमः षड्जग्राम एव न मध्यमः।।

क्रमात्स्वराणांसप्तानामारोहश्चावरोहतः ।४९। मूर्छ्यते यत्र रागो हि श्रोता वा मूर्छनामता ।
ताः सप्त मध्यषड्जेन मूर्छनारभ्यते ग्रिमा ।५०। अधः स्तनै निषादाद्यैः षड्जस्थाने स्थि
तैः क्रमात् । षड्जन्या मूर्छनाः सादीन्तदूर्ध्वं सारये क्रमात् ।५१। यस्मां यावति पः षड्जः ता
वतिथ्येन मूर्छना । अथ्याचोत्तमंमंद्राचरजनीचोत्तरायता ।५२। शुद्धषड्जा मत्सरिका
ताऽश्वक्रांताभिरुद्गता । नामान्युक्तानि भिर्मूर्छनानां यथाक्रमं ।५३। रागोपयोगत
स्तास्तु षाडवौडुविती कृताः । षड्स्वरैः षाडवाः प्रोक्ता स्त्वौडवाः पंचभिः स्वरैः ।५४। शु
द्धतानाइतिख्याताः पूर्णास्तान क्रियात्मकाः । प्रवेशानिग्रहाभ्यां च द्विधा तानक्रि
या भवेत् ।५५। प्रवेशाः परसाद्दश्यमीषस्पर्शस्तु तिग्रहः । व्युक्रमात्कूटतानाःस्युः

पूर्णापूर्णाः पुरोदिताः ५६ इति नादस्थाश्रुतिस्वरग्राममूर्छनातानाः॥ कंचित्क्रमं विलि
२५ः ख्यादौ पूर्वैः पूर्वैः परादधः [illegible] स्वरः स्थाप्यः स चेदग्रे तत्तत्पूर्वस्वरो भवेत्। ५७ प्रस्ता
रो वामतः कार्यः पुरस्तूपरिवर्जितः। मूलक्रमात्क्रमाद्दृष्टे शिष्टाः प्रस्तारईदृशाः ५८ क
मात्पूर्वस्वरस्थांक संख्यां स्यादिस्वरावली। अंत्यादधो विविलिखेत्तत्तलं स्यात्का क्रमो भ
वेत् ५९ तत्रैकस्वतश्चांत्योपांत्यधारां ततोन्यथा। मालाप्रस्तारक इति विठ्ठलेन प्रकीर्त्ति
तः ६० इति प्रस्तारः। अंकानेकादिकमारभ्य स संख्याता निलिखेत्क्रमात्। उर्ध्वमूर्ध्वे विह
न्यात्तु पूर्वेणांकं परे परं। एकस्वरादितानानां संख्यैवं जायते स्फुटं ॥१।१।२।६।२४।
१२०।७२०।५०४०॥ इति संख्या। मूर्छनांत्यस्वरस्थांकाः प्रश्नांके पातयेत्तु तान्। ६२॥

द्रोषात्प्राकृप्राकृस्वरस्थांके यथाहनन संभवेः। क्रमेणपातयेद्वेनाहतिस्तावतिथस्वरः ६२
स्यात्तृतीयाद्गणानंनष्टसिद्धिंभवेत्तदा। इत्युद्दिष्टं। नष्टबोधगतायेंकास्तानंत्यांकेषुपा
तयेत् ६४ शिष्टउद्दिष्टसिद्धिः स्यादित्यभाषतविठ्ठलः॥ इत्युद्दिष्टं। गानक्रियोच्यतेवर्णः
सचतुर्धा निरूपितः ६५ स्थाय्यारोह्यवरोहीचसंसारीत्यथलक्षणं। स्थित्वास्थित्वात्र
योगः स्यादेकैकस्यैवस्वरस्ययः ६६ रागादिव्यवहारेषुस्थायीवर्णः सउच्यते। आरो
हंतिस्वरायत्रचारोहीसप्रकीर्तितः ६७ यत्रचैवावरोहंतिसोवरोहीतिगण्यते। एतेषां
मिश्रणाद्वर्णः संचारीपरिकीर्तितः ६८ इतिवर्णः। विशिष्टंवर्णसंदर्भमलंकारंप्रच
क्षते। तस्यभेदाबहुतरास्तत्रस्थायिगताब्रुवे ६९ येषामाद्यंतयोरेकस्वरस्तेस्थायि

नः स्थिताः । मंद्रादिस्थाथमंद्रांतो मंद्राद्यंतारकूयस्ततः ७० मंद्रमध्याभिधः पश्चान्मंच

मः क्रमते चितः । स्थाय्यिवर्णगताः पंचालंकाराः परिकीर्तिताः ७१ विस्तीर्णः सन्निकर्षश्च

प्रेंखः प्रच्छादनस्ततः । आक्षिप्तबिंदुसंहितसिताः सत्यचारो हिलिस्थिताः ७२ प्रसादः स्रा

ग्मुखो त्क्षेपोपरिक्तो ह्याहितो ततः । निःकूजितो रेचितश्च स्खलितः क्रमरंजितो ७३

ह्रादमानश्चाहुंकारः रेचनः संचारिवर्णगाः । त्रयोदशाक्रमोद्देषामथ लक्षणमुच्यते

७४ मंद्रप्रकरणेत्रस्यान्मूर्छनाप्रथमस्वरः । स एव द्विगुणस्तारः पंचमो मध्य उ

च्यते ७५ लिपीमंद्रो बिंदुशिरास्तारो रेखाशिरो भवेत् । मंद्रमध्यास्वरे तारे मंद्रा

दिः कथितो यथा ७६ संपसातर्द्वलोम्येनमंद्रांतः । सापसं २ मंद्रमो मध्यगे पुनः ।।

तारे च मंद्राद्यंतः स्यात् । संसस ३ तारयोर्मध्यगे तथा । ७७ मंद्रे च मंद्रमध्याख्य

मलंकारविदांविदुः। ससंस ४ आद्यंतेमूर्छनादिस्थेस्वरोमध्येद्वितीयकः। ७ ॥ सैकाक
लाथचेन्मध्येसप्ततीयचतुर्थके। सद्वितीयापंचमाद्यास्त्रयोंतस्थेकलापरा ९
एवंकलात्रयेणोक्तोलंकारः क्रमेरेचितः। संरिसं। संगमसं। संपधनिसं। ५। इति
स्थायिगतालंकाराः। मूर्छनाद्यस्वराद्यत्रक्रमेणारोहणंभवेत्। ६। स्थित्वास्थित्वा
स्वरैर्दीर्घैः सविस्तीर्णोभिधीयते। सारीगामापाधानी। १। ह्रस्वैः स्वरैः सन्निकर्षो
द्वाविंद्विरूचैर्निरंतरैः। ८। १। ससरिरि। गग। ममा। पप। धध। निनि। २। स्वरद्वयं
समुच्चार्यपूर्वपूर्वपरंपरं। यत्रांतेलितमारोहे प्रेंखाख्यः कथितोयथा ८ २ सरी।
रिगा। गमा। मपा। पधा। धनी। निसा। ३। त्रिस्वराद्याकलांस्तेवपूर्वपूर्वोत्तिमा
दिमे। कलेस्तस्तिस्वरेयत्रतदाप्रच्छादनाभिधः। ८। ३। एकांतरंस्वरयुग्मंताहक्रम

वेयुतं परं । क्रमादारोहति यदा तदा क्षिप्तं प्रचक्षते ४ सग । गप । पनि । ५ । पूर्वस्वरं
त्रिरुच्चार्य सकृत्तस्य रकं स्वरं । एवं क्रमं क्रमात् कुर्वन्नारोहेद्विंदुसंज्ञितः ५ ससस
रि । गगगम । पपपध । निनिनिस । ६ । यत्रैकोत्तरवृद्ध्याभिरावृत्तिस्तिरुदीरिताः ।
आरोहंते स्वराः प्राह हसितं तं मुनीश्वरः ७ सरिरि । गगग । मममम । पपप
प । धधधधधध । निनिनि निनिनिनि ७ आरोहत्क्रमोद्दिष्टेस्सस्वाप्यवरोहि
ति । इत्यारोहवरोहालंकाराः पूर्वः पूर्वपरस्यार्द्धं धावत्तरं क्रियते स्वरः ८ । प
दातदाप्रसादंतंमाह श्री भरतो मुनिः । सरिस । रिगरि । गमग । मपम । पधप ।
धनिध । निसनि । ९ । कलागतागतवृत्ती द्विस्वरैकैकहानतः १० । यत्रान्यास्त
राः सस्यालोप्युखः परिकीर्तितः । सरिरिस । रिगगरि । गममग । मपपम ।

पधधप। धनिनिध। २। त्रिः स्वराश्चेत्कलपूर्वपूर्वस्त्यागो ध्वंसे क्रमेः ९। यदा लंदोक्षेपकारव्यः प्र
सिद्धो गानवेदिनि। सरिग। रिगम। गमप। मपध। पधनि। धनिस। ३। स्वरं द्वितीयमुत्सि
ख्य त्रित्रिस्वद्याकलायदि १० सत्क्रादारं ताहश्यो न्यस्तदापरिवर्तकः। सगम। रिमप। ग
पध। मधनि। ४। कलायां त्रीन्स्वरान्गीत्वावरोह्येकं पराकलाः। ११। यत्रैकैको ज्झितागी
तास्तद्दुक्ताहिलस्तुसः। सरिगरि। रिगमग। गमपम। मपधप। पधनिध। धनिसनि ५
प्रसादस्यकलां गीत्वान्तकलायास्तृतीयकं। १२। गत्वाद्यगानाद्भवति निःकूजितकः।
मकः। सरिसगस। रिगरिमरि। गमगपग। मपमधम। पधपनिप। ६। आद्यस्वरं द्वि
तीयं च तत्कलीयं च द्वितीयकं। १३। पुनः क्रमात्स्वरांस्त्रींश्च गत्वाच्चैककलायदि। एवं क
लाषट्कं कं च गीतासोरेचितः स्मृतः १४ सरिसरिसरिग। रिगरिगरिगम। गम

गमगमप। मपधमपध। पधनिधपधनि। धनिसनिधनिस॥४॥ कलांत्रयु
ज्यमंद्रे द्विरुक्तो द्वौ स्वरान्वितां। अनस्थ्येतत्र्चे देवस्खलिताख्यस्ततो भवेद॥५॥
सगरि ममरिगस॥ रिमगपपगमरि। गपमधधमप गामधपनिनिपधम॥६॥
यत्रास्तौ क्रमदत्युक्तः कलाद्वित्रिचतुःस्वराः। आद्यस्वराद्या। स्तिस्त्रः स्युर्द्विलीयाद्या
दयस्तथा॥९॥ सरिसरिसरिगम। रिगरिगमरिगमप। गमगमपगमपध।
मपमपधमपधनी। पधपधनि। पधनिसा॥९॥ द्विरुक्तायां द्विमंद्रांतामंद्रो द्वे स्युः
कलास्तदा। रंजिताख्या भवेदेषः प्रसिद्धो गाननेदिनां॥१७॥ सगरिसगरिस॥
रिमगरिमगरि। गपमगपमग। मपधमपधम। पधनिपनिधप॥१०॥ हाद्यमा
नेलुमंद्रांतामंद्राद्येस्तु कलामता॥ सगरिस॥ रिमगरि। गपमग। मधपम॥ पनि
धप॥११॥ आद्विमनकलायत्रद्विः स्वराद्यागतागतैः। टौ स्वरैर्नेकौ न्तैरर्द्वदः सऊं

कारो निगद्यते। सरिरिस। सरिगगरिस। सरिगममगरिस। सरिगमपपमगरिस। सरिगमपधधपमगरिस। सरिगमपधनिनिधपमगरिसा २ क्रमात्सरिगमाद्यैः स्यात्तद्द्वयेनः संवादि युग्मकैः ।११। सप। पध। गनि। मस ।२। एते संचार्य लंकारा आरोहेण प्रदर्शिताः। एतानेवावरोहेणप्राहश्री भरतो मुनिः ।१००। इति संचार्यलंकाराः। इति प्रसिद्धालंकाराः कथिताः पंचविंशतिः। अनंतत्वात्तु तेशास्त्रे न सामस्त्येन कीर्तिताः। रक्तिलाभः स्वरज्ञानं वर्णांगानां विचित्रता। इति प्रयोजनान्याहुरलंकार निरूपणे। ३। इत्यलंकाराः। गमकः स्वरकंपः स्याच्छ्रोतुहृदयरंजकः। तस्य भेदास्तु तिरिपः स्फुरितः कंपितस्तथा। लीन आंदोलित वलित्रिभिन्नकुरुलाहताः। उल्लासितः प्लावितश्च मुद्रितो कुंपितस्तथा। ४। नामितो मिश्रितः पंचदशास्य थलक्षणं॥ ५

लघ्विष्ट उमरुध्वानकंपा तुर्स्यं तु सुंदरः ५ द्रुतलुयैर्भागवेगेनातिरिपः परिकीर्त्तितः।
स्फुरितो द्रुततत्तीयांशात् २ द्रुताल्पकंपितं विद्दुः ६ द्रुतवेगेन लीनः स्यात् ४ आंदोलो
ल घुवेगतः ५ वलिर्वेगाधिकत्वेन ६ त्रिभिन्नस्तु स उच्यते ७ त्रिस्थानेषु स वै भिन्न
म विश्रांत घनस्वरः। कुरुलो वलिरेव स्यात्कंठ कोमलयं धितः ८ स्वरमन्निममाह
त्यनिवर्त्त्य तु स्साहतो भवेत् ९ उल्लासितः क्रमाद्भिन्न १० प्लावितः प्लुतमानतः ११।।
हृदयंगमहुंकार भंगी रोहुंफितो भवेत् १२। मुद्रितो मुखमुद्रणा १३ नामितोनमना
द्भवेत्। १०।१४। कतिचिन्मिश्रणान्मिश्रो बहुधाप्यूह्यते बुधैः १५ इति गमकाः।।
रागस्यावयवः स्थायो नागो गमक उच्यते १ भयो को गमकः पूर्वमधुना स्थाय
उच्यते। भजनं स्थाय पनगती शब्द पालो च वाहिनी। २ भायाचेति क्रमात्तेषां ल

क्षणं प्रतिपाद्यते। रागस्यातिशयाधानो ध्वनिः परिकीर्त्तितः १३।१ मुक्तशब्दः प्रतिग्रा

ह्यः शब्दो माधुर्यपुष्टितः। चतुर्भेदो भवेच्छब्दः खाहुलो नारहाठकः १५ बोंबको मिश्र

३ क कश्चेति कफजः खाहुलो मतः। असौ सुस्निग्ध मधुरो ढलास्सौकुमार्यकं दृ। मु ३

१६ पित्तजो नारहाठः स्याद्रूक्ष गंभीरयुग्ध्वनिः। वातजो बोंबकः स्यात्तु स्थूलो निः

सारतायुतः १७ एतत्संमिश्रणादुक्तो मिश्रकः सान्निपातिकः। निःसाररूक्षतो ही

न उत्तमः परिकीर्त्तितः १८ खाहुलो बोंबसुक्तश्च मध्यमः कथितो बुधैः। बोंबनारा

टसंयुक्तः शब्दानामधमः स्मृतः १९ विलुंठनात्मको मुक्ताफलवल्लालउ

च्यते ५ अरोह्याद्दित्रये भीदं कंपनं वाहिनी भवेत् २० छायाकाकुः बहुप्रकाराः

स्वरगारान्यरागजाः। स्याद्देशक्षेत्रयंत्राणां तद्वक्षणमथोच्यते॥२२ श्रुतिन्यूनाधि
कत्वेन यास्वरा श्रयसंश्रया। स्वरांतरस्य रागेस्यात्स्वरकाकुरसौमतः २ अन्यरा
गस्य निजछाया रागकाकुंतुतां विदुः। सात्वन्यरागकाकुर्या रागेरागांतसंश्रया।
२३॥ स्याद्देशकाकुर्या रागे भवेद्देशस्वभावतः। शारीरं क्षेत्रमित्युक्तं प्रतिक्षेत्र
निसर्गतः २४ रागनानाविधाकाकुः क्षेत्रकाकुरिति स्मृता। वीणावंशादिको
द्भासौ यंत्रकाकुः सतां मता २५।७। इति स्छायायाः। वर्णालंकारसंपन्ना गम
स्छायिचित्रिता। आलिप्तिरुच्यते तत्रैर्बकुवैचित्र्यसंयुता। २६ ग्रहांशता
रमंद्राणां न्यासापन्यासयोस्तथा। अल्पत्वस्य बहुत्वस्य षाडवौडुवयो
रपि २७ अभिव्यक्तिर्यत्र दृष्टा सरागालापउच्यते। आलप्त्यालापयोः सम्यकु

प्रकटीकरणंयत्। २८। रागालापनमित्युक्तं लक्ष्यलक्षणकोविदैः। आलप्तिर्द्विविधाप्रोक्ता
रागवस्तुविशेषणात्। २९। स्वस्थानकैश्चतुर्भिर्या क्रियते रूपकं विना॥ रागलप्तिर्य
त्ररागस्वरे संवेद्यते च सः ३० स्थायीतलश्चतुर्थस्तु घार्द्ध इत्यभिधीयते। स्थायि
स्वरादष्टमस्तु द्विगुणः परिकीर्तितः ३१ घार्द्धद्विगुणयोर्मध्ये स्थिता अर्द्धस्वरा
भिधः। स्थायिनो घार्द्धतो वी कुस्वरसंचालनं तथा ३२ स्थायिनोधस्तनं चापि वा
दनास्थानकं भवेत्। घार्द्धस्वरे चालयित्वा न्यसनं तद्द्वितीयकं ३३ अर्द्धस्वरे चालयित्वा
तदेव तु तृतीयकं। द्विगुणं चालयित्वा तु स्थायिन्यासाच्चतुर्थकं ३४ एभिश्चतुर्भिः
स्वरस्थानैरागालप्तिर्मता सतां। आलापएव ठायः स्यात्स्थगभूतविदारिका २५
ळ१ रूपकस्थेन रागेण तालेन च विधीयते। रूपकालप्तिरेषा तु द्विविधा परिकीर्तिता। २६।

प्रतिग्रहणिकाद्याच जंभनी संज्ञकापरा। विधायस्थायमालप्तेरूपकावयवोयदि ३७
प्रतिगृह्यत संप्रोक्ता प्रतिग्रहणिकाबुधैः। जंभनी द्विविधाप्रोक्ता स्थायरूपकजंभना
त् ३८ यद्गातत्समानेनस्थायीरूपकसंस्थितः। नानाप्रकारैः क्रियतेसाज्ञेयास्थाय
भंजनी ३९ तैः पदैस्तेन मानेन समग्रं रूपकंयदि। अन्यथावान्यथागायेत्सोरूपक
भंजनी ४० इममेवोच्यते लोके नेमत्राबद्ध गायकैः। इत्यालप्तिभेदाः। स्तोकस्तोकस्त
नुस्थानैः प्रसन्नैर्बहुभंगिभिः ४१ जीवस्वर व्याप्तिमुख्यैरागस्यस्थापनाभवेत्।
इतिस्थापना। योसौ ध्वनिविशेषस्तु स्वरवर्णविभूषितः। रंजकोजनचित्तानां
सरागः कथितो बुधैः। स्वराणां क्रमभेदाच्चनानागमकसंयुतः ४२ षांडुवौडुवभेदाच्च

११ संपूर्ण इति भेदतः। ग्रहांशन्यासभेदाच्च नानादेशजनोद्भवाः ४४ अनंता रागभेदाः स्युरु
द्दिष्टास्त्वराशिधाः। शुद्धसालगसंकीर्णा इति रागास्त्रिधा पुनः ४५ नान्योपजीविनः शुद्धाः
केवलारंजकात्मकाः। छायांतरेण युक्ता ये रागाः सालंगसंज्ञकाः ४६ मूलछायांतरा
द्युक्ताः रागाः संकीर्णका इति। अनंतत्वात्तु रागाणां प्रत्येकं वक्तुमक्षमः ४७ केषांचिन्मत
माश्रित्य कतिरागान्वदाम्यहं। शुद्धभैरव हिंदोल देशीकारास्ततः परं ४८ श्रीरागः रागा ५
शुद्धनाटश्च नटनारायणश्च षट्। रागा देवमयाः ख्यातास्तेद्भुः कथ्यते धुना ४९ सद्यो
जातोद्भवः शुद्धभैरवो वामदेवतः। हिंदोलो देशीकाराख्यस्त्वघोरात्तत्पुरुषतः ५०
श्रीरागः शुद्धनाटाख्यापीशानवदनोद्भवः। नटनारायणो रागो गिरिजामुखत
स्ततः ५१ एतेषां वनिताः पुत्राः पंच पंच क्रमाद्भुवं। धन्यासी भैरवी चैव सैंधवी ११

मारवीतथा ५२ असावरीतिपंचैताः शुद्धभैरवसूनवः। भैरवः शुद्धललितःपं
चमः पूरुजस्तथा ५३ बंगालश्चेतिपंचैते शुद्धभैरवसूनवः। नेपालीचवराढी
चतोडीप्रथममंजरी ५४ गुरुस्कतोडिकाचेतिनार्यो हिंदोलकस्यच। वसंतः
शुद्धबंगालः श्यामः सामंतकस्त्यकस्तथा ५५ कामोदश्चेतिपंचैते हिंदोलस्य
सुताअमी। रामक्रीजाबकुली देशी जयतश्रीश्च गुर्जरी ५६ देशिकारस्यपंचै
ताविख्याश्च वरांगनाः। ललितश्चविभासश्च सारंगस्तिरवणस्तथा ५७ कल्या
ण इति पंचैते देशिकारस्यसूनवः। गोडीपाडीगुणकरी नाट्टरामक्रियातथा ५८
हि२ गुडक्रीतिपंचैताः श्रीरागसमाश्रिताः। टक्कश्चदेवगांधारो मालवेश्च शु
द्धगौडकः ५९ कर्णाटबंगालइति श्रीरागस्यतनूद्भवाः ६० मालवश्री देशाक्षी स्व १

देवक्री मधुमाधवी। अहेरी चेति विख्याताः शुद्धनाटवरस्त्रियः ६० जिजावंतश्च सा
लंगा नाटः कर्णाटकस्तथा। छायानाटो हमीरादि नाटो नाटस्य सूनवः ६१ वेलावली
च काबोजी सावेरी सुहवी तथा। सोराष्ट्री चेति पंचैता नटनारायणस्त्रियः ६२ मल्लार
गौंड केदार शंकराभरणस्ततः। बिहागउश्चेति सुतान टनारायणस्य च ६३ अथै
षां लक्षणं वक्ष्ये मूर्त्याभरणपूर्वकं। यद्धानेत्राधिकां संज्ञां ज्ञायतां लोकतः सुधीः ६४
सद्योजातादिवोयं प्रथमगतिमतिः सत्रिकोटिः कपर्दी रक्तवर्णस्त्रिशूली सि
ततरवसनो भस्मदेहस्त्रिनेत्रः। कंठे भ्रंगिद्धानः श्रवणयुगुलतामुद्रिके च
ज़ू [illegible] इन्द्रे[illegible]मौले पिप्रभाते विलसति वृषगो भैरवः शुद्धपूर्वः ६५ इति शुद्धभैरवः॥
१धा सर्वांगभूषणा बद्धा धनि रिगविधुगासन्त्रिकास्ता रिधाभ्यां दूर्वा सामवि

चित्रांबररा चितनुरदीउमी पुष्पहस्ता नेत्रांतबाष्पयुक्ता धवलसहचरी पूर्वजैराकनाम्नःप
श्यंती गीतकस्मादसिबकुधनदा धन्यधन्यासिकासा ६६ इति धन्यासी। २। धन्यासीमेल
जाता स्वरसकलयुता चाद्रिमध्यांतषड्जा तन्वंगी चंद्रवक्त्रा कनकसमतनुः श्वेतवस्त्रं दधा
ना। भाले सिंदूरबिंदुर्भिकसितवदना सर्वशृंगारकाढ्या मत्स्यंती गीयमानाद्विकिजन
रता भैरवीसा प्रभाते ६७। इति भैरवी। ३। भैरव्यामेलजाता स्वरसकलरतास्त्रिका
चंद्रवक्त्रा तन्वंगी पद्मनेत्रा विपुलसुजघनामत्तमातंगमाती। मंदंमंदं वदंती बकुलवि
धगमकैः सैंधवी रक्तवस्त्रा सुरूपा धेस्वराणां विमलतरयत्राः प्रार्थयंती सदासा।
६८ इति सैंधवी। ४। वंगास्यारीघंकेत्री न्वतलगीते निगासत्रिकासारि धाम्यां।
हेमाभादीर्घरूपा बकुधकुसुमैर्भूषिता स्निग्धनेत्रा। मेवाडस्या प्रजातामग त्रिभु

१२ नयनारक्तवस्त्रं दधाना चेषत्हास्या स्तुवंती युधिन्नपतिगणान्मारवी सा सदैव ॥ इति मा
रवी ॥ ५ ॥ गांधारो चाग्निगः स्यात्त्रयमगतिग निमी दिमध्यांतपूर्णा तन्वंगी श्यामवर्णा क
रधृतकनकुकुरा सर्वशृंगारयुक्ता ॥ रंभायाः काननेषु प्रियविमलयशो ध्यापयंती सुकेशं
गंधर्वैस्तूयमाना प्रियरसकरुणा शश्वदासावरी सा ॥ १० इत्यासावरी ॥ ६ ॥ भस्मांगाः
कंठशृंगी श्रवणयुगुलतः शंखमुद्रं दधानः पादत्राणप्रवाले फणिपतिसुजटाबद्ध
मौलिः प्रमत्तः ॥ उज्ज्वालस्यानुयायी पटुतरवचनः किन्नरीवाद्यमानः पूर्णो धा
धांतमध्यस्थनलविधुगतिः भैरवः पूर्वयामे ११ ॥ इति भैरवः ॥ ७ ॥ सांशाद्यंतः
प्रवीणः श्रुतिरपि ललिता मारवी मेळजातो भाले धत्ते सुबिंदुं कनकरुचिनिभं श्
भ्रवस्त्रं दधानः ॥ गौरांगश्चंपमल्ली कुसुमभरशिराः पंकजाक्षो विलीकामीतांबू १२

लहस्तः प्रतिदिनमुषसि प्रायिकः खंडितानां ७२ इति शुद्धललितः। ८। श्यामंतो
रूलहस्तैः करधृतकुमुदं मारवीमेलजातं पत्रिंचारिं सुरेखां पिकमृदुवचनं वेणुकं
पीलवस्त्रं। लिप्तांगं यक्षपंकैः शिरसि सुमुकुटं बालचंद्राद्य भालं गायंती ह
त्रनाके सकलसुरनराः पंचमं सुप्रभाते ७३ इति पंचमः। ९। सप्तिः संपूर्णको
सौ द्विविधुगतिगतिस्तालहस्ता सुभार्या दक्षैपेक। नोपाणिर्बद्धविधरचितैर्भू
षणैः शोभमानः। गौरो दीर्घस्वरूपी मृदुवचनपरः सर्वलोकोपकारी नित्यं
व्यः सदाह निशि च सुपरजो भाति चाग्रे नृपाणां ७४ इति परजः। १०। अंसो
गश्चस्वरो स्तस्त्रिनयनगतिगौसत्रिका व्यश्च पूर्णो वामपाणौ सुमालां शरा
धरमणिमां शुभ्रवस्त्रं दधानः॥ बंगालः पानपात्रं विराद्रकन कजं सव्य

हस्ताग्र भागे विद्धा न्संगीतवेदं पठति च मितरां तंद्रुतैः कंपभेदैः ७५ इति बंगालः १११
इति भैरवपरिवाराः। १। अस्मिन् रागे मेवतां प्रथमगतिगनी सन्निको र्त्ता रिपौ सौगो
रांगः पीतवासा घनकुसुमवने क्री उकोर्दोलयाने। हिंदोलः स्त्री हेसेयः कटकमुकुट
मुक्ता महाकुंडलाद्यः। प्रातः काले वसंते विचरति चतुरो वामदेवाभिज्ञातः ७६
इति हिंदोलः। १। जाता मकुरमेळे निगरतिरहिता मान्दिमध्यांतरूपां भासाये
स्वर्णपुष्पं कमलनयनयोः कंडजाळं कंठमालां। मौक्तेयं भालमध्ये वरतरतिलकं
कंकणे हस्तमूले रक्तं वस्त्रं दधाना नवरतमदायाति भूपालिकासा ७७ इति भू
पाली। ... छयाया मृदुलरवचनैः क्रीडिता चाळिंगुंजै चित्रं वस्त्रं दधाना
कुसुमसुकबरी चामरैर्वीज्यमाना। नानाशृंगारयुक्ता मदनसहचरी कोमलांगी

सुगौरी सायं पूर्णा त्रिषड्जत्व न लगति निषाराज तस्मा वराळी ७८ इति वराळी ।३।
स वीणा हस्ते सुदंडी खपर करतले ताल युग्मं दधाना किंसांगा वंदना घे सुराबर
वसना सर्वभूषाभियुक्ता । प्रौढा तांबूल वक्त्रा विकसित नयना मोहिनी मुक्तचूर्णा
माद्यंत मध्या प्रथम गति गति स्तो डिका प्रातरेव ७९ इति तोडी ।४। जाता गौडस्य
मेळे धरिपा विरहिता नादि मध्यांतरां या गौरांगी पीत वस्त्रा मृगमद तिलकं भा
ळ मध्ये दधाना । हस्ते वीणेक वाद्या सरसम धुर मुक्त केशी कुरंजी प्रीतालंकार
युक्ता प्रथम पद पुरा मंजरी सा सदैव ८० इति प्रथम मंजरी ।५। छाया नाटस्य मेळे
प्रकटित सुल नुर्मा दिम ध्यांत पूर्णा गौरांगी मूर्द्धि वेणी कनकमणिमय पंकजे भूषं
दधाना । प्रौढा षड्जाख्याने नायवन सुवनिता वस्त्र वेषा दिका द्या इक्षां पीला प्रभाते

१५ विलसति चतुरा यावनी तोडिका सा ६ इति तुरुष्कतोडिका ॥ ६ ॥ जातो हिंदोलमेळे
स्वर सकलयुत: सत्रिक: ... पोते त्यारामे क्रीडमानो नवदलकुसुमामोदलुब्धा
लिवृंदे। तांबूलास्यो प्रतिगौरोर तिपतिसदृशो रक्तवस्त्रः सार्द्धं योषिद्भिः सर्व
वाद्यार वर भसमहद्धास्ययुक्तो वसंत: ७ इति वसंत: ७ जातकर्णाटमे
ले स्वरसकलरतो मत्रिक: पूर्णकाय: शुभ्रांग: पीतवासा मणिगणरचितेकुंड
ले कर्णयोस्त: ॥ आस्तमौलौ किरीटं करतलकमल: कुंकुमालिप्तदेह: प्रात
र्याच्य: प्रमत्तो युवजनसहित: शुद्धबंगालको सौ ८ इति शुद्धबंगाल: ॥ ८ ॥
क...कं सो ...तिर्मल प्रकट वरतनु: सत्रिक: पूर्णरूप: रागमोग: पीतवासाम
धुरतर वर: कंपमदैर्विचित्रै: ॥ कंठे रत्नै कमाला विरचिततिलक: कुंकुमै १५

श्री ल मध्येरागः श्यामांसिधानस्त्वनवर मदः कामिनीनांविनोदः ४ इति
श्यामः ॥ ९ ॥ गौडारव्यस्यमेळेप्रकटवरतनुः पूर्णरूपस्त्रिषड्जः पद्मांघ्रिः
पद्मनेत्रः श्रवणयुगुलतः कुंडलेद्वेदधानः । बिभ्रन्मौलौकिरीटं बकुकु
सुममयं कंठमालांसुवस्त्रंप्रातःकालेचकास्तिप्रबलगगम कपानूपोढसा
मंतरागः ८५ इतिसामंतः ॥ १० ॥ कामोदः कामरूपीध्वतकुमुदकरः श्वेत
वस्त्रंदधानः कस्तूरीबिंदुभालः कुसुमसुमुकुटः कंठमालादधकंठः ॥
वक्रासेयंगव्यवास्यंसुवजनसहितोवेत्रहस्तः प्रतापी । संपूर्णः सत्रिकोसौ
विधुमलिगतिकश्चापण्हेचकास्ति ८६ इतिकामोदः ॥ ११ ॥ इतिहिंदोल
परीवाराः ॥ आतोघोरारव्यवक्राद्विगतिगतिगमाः सत्रिपूर्णोत्ररागरकोगः

१ म्रनेत्रः सितगजगमनो वारवैदेवस्य मित्रं॥ कंठे रत्नैकमालो धृतमुकुटशिरा सिद्वित्र
रासासखड्गं। मध्याह्ने योधसंघे सुललितं शिरे देशिकारश्च कास्ति ८७ इतिदेशि
कारः॥१॥ हृष्टा हास्यासुमुक्ता मणितरलगला नीलवस्त्रा दधानाकार्पासं रक्तवर्णं
र्णीकर चरणयुगे कंकणं नूपुरं च। रामक्री चंचलाक्षी विमललरगलगिरोहारयंती
विदग्धा शृंगारा ध्यान्निषण्णात्वनलगतिगति राजतेसर्वदैव।८८। इतिरामक्री॥२॥
रामक्री मेलहृष्टा निगपरिरहिता वाष्पिमध्यंतमध्यातन्वंगी श्यामवर्णा विलुलिम
तकबरी सव्यहस्ते सुदंडा। तांबूलास्या प्रगल्भा मरहठवनिता वस्त्रभूषादि
काढ्या नासाग्रे पीनमुक्ता बकुमंति बकुली ज्ञोभ्रतेपूर्वयामे ८९ इतिबकुली॥३॥
धम्मिल्लमाल्ली मालां श्रवणयुगुलतः कुंडले कंठमौलां कूर्पासंपत्त्रवस्त्रं चरणक

र्युगे नूपुरे कं कणेच ॥ आहंगस्यश्रपौत्री म्दुसुकरतलेपल्लवेसंदधानागांधा
र्वेतुगीस्तत्रिसमयपरि रपासर्वदाभातिदेशी १० इतिदेशी । ४ । नासाग्रे
श्रीलवंगंजलजंखुटिलिकेकुंभिकेश्रोत्रयोर्द्वे चोलीकौसुंभवस्त्रंशिशुवधु
तिलकंचांजनंनेत्रयोश्च हस्तद्वंद्वे सुकांचप्रवलयनिचयंमूर्द्ध्विवेणींदधाना ॥
देशीमेलेरुचिरासकलसुजयतश्रीस्त्रिसाश्चापराहे । इयतश्री । ५ । संध
तेहस्तमूले करिरदवलयान्वंघ्रिमंजीरयुग्मं नासाग्रेहेमपुष्पंकनकरविनि
र्मकंचुकीरक्तवस्त्रं । दिं बोष्ठीगौरवर्णा द्विवस्तुसुरचितामुक्तकछाय्यसावा
रामक्रीमेलसौख्याव्रिसमयरिरसौ गुर्जरीयंप्रभाते ॥ १२ । इति गुर्जरी ६ । दे
शीमेलेप्रजातः स्वरसकलसुतोधात्रिकञ्चंचलाक्षोहस्तेपद्मंदधानःसुचिवे

स नरतः स्निग्धशृंगारसर्वः। मुग्धस्त्रीसत्समक्षं हसति सकपटं घूर्णितांबूलवक्त्रः
कामी कामावतारः कुटिलसुललितो भाति धृष्टः प्रभाते ९३ इति ललितः ७। गौरांगः
पंकजाक्षः सुशावर वसनो भालका स्मीरबिंदुः मल्लीस्त्रग्भूषकंठश्चतुरवरगिरं की
रमध्यापयन्यः। मेले तालस्य जातस्त्वधिकप्रथमः सत्रिकोपः शठोसौ स्वेच्छागामी
प्रभाते वदंति विनायितां श्रीविभासाख्यरागः ९४ इति विभासः ८। श्यामांगः पी
तवासाः प्रबलतर गदा शंखचक्राब्जहस्तो वीर्यैः शार्ङ्गपूर्णः स्फुरदिषुधिक
टिस्सन्नाहयुर्गोप्यमाद्यः। गांधारो वेदगः स्युर्गुणगतिमतिधाः पक्षगा रिस्त्रि
षड्जः संपूर्णश्चोपरोहे च रति चतुरो धीरसारंगरागः ९५ इति सारंगः ९।
देशी सन्मेलजातस्त्रिविधसमयसः पूर्णरूपाति गौरः कंठेमौक्तेयमालाधृत

स्फुटशिराश्चित्रवासश्चरम्यः पुष्पश्रीकंदुहस्तोयुवजनसहितोमन्मथानंदक
र्ताशृंगारीपएयवीथ्यांतरगतिरवणः शोभतेसायमेषः १९ इतितिरवणः १०
सत्रिःपूर्णाह्निनेत्राग्नियमरिगमनिनीराजवृंदेःसमेतोगौरस्तांबूलवल्कःसि
ततरवसनःकंठरत्नैकमालः। कंजाक्षःछत्रमूर्द्धाभयचतुरभुतोरत्नसिंहा
सनस्थः कल्याणोयमनाद्यपरिजनसहितोराजतेसोदिनांते १७ इतिक
ल्याणः ११। रामक्रीमेलजाताथगपरिरहितासत्रिधाषाडशाद्याचित्रंवस्त्रं
दधानाकरधृतकमलाकर्णनेत्रासुकेशी। चैत्रीमूल्यानिभूवरवरयवनपुरी
कर्पूटीपिसार्द्धंसंक्रीडंतीदिनांतेचतुररतिकलागौरदेहालगौडी॥१९ इतिगौडी॥
२॥ गौडीमेलेसुलग्नात्रषमगुणगतिस्वकगापंकजाक्षीमर्त्तुःसंतापहंत्री

स्मितविधुवदना गीतनृत्याभिसक्ता। गौरांगी शुक्लवस्त्रा तरुणतरमदोन्मत्तमातंगया
नी शृंगाराढ्या हि पाडी युवजनहृदयानंदिनी वासरांते १०० इति पाडी॥ ३॥ गुर्जर्यी मेल
जाता स्फुरिततरसपान्यादिमध्यांतपूर्णा वक्षोहारायताक्षी वरसितवसना रक्तकूर्पासि
काया। नानाशृंगारभूष्या मृदुमधुवचना श्यामा श्यामांगी सुतन्वी। भर्तुःसंकेतसेकैर्द्वि
मल गुणकरी कामिनी याति सायं ।१। इति गुणकरी।४। संपूर्णा सत्रिकाया गुणविधुनि
गगा किन्नरी वाद्यहस्ता श्यामांगी दीर्घनेत्रा सुगुरुजलकैर्ः कंठमालादिभूष्या॥
मध्ये षड्रक्त वस्त्रा वरगजगमना स्वर्ण कूर्पासयुक्ता वक्रं सायं प्रयाति त्रिपचकित
गुणां नादरामक्रियासः ।१। इति नादरामक्री। गुर्जर्यां मेलयुक्ता रिधपरिरहिता
सत्रिका नीलवस्त्रा गौरी मुक्तावलकाया नवनगर चिता कामसंकेत संस्था।। नीप

छायापुविष्टा [illegible] विमल करतले पद्मपत्रं दधाना गुंजश्री भामिनी
सा प्रियतमपदवीं प्रेक्षयंती प्रभाते ।३। इति गुंडकी ।६। नस्यासक्तः सहिकुर्नयनग
तिगतिः सांद्रिम ध्वांत पूर्णो वक्षोहारं सरत्नं सुकटकमुकुटं चित्रवस्त्रं दधानः ॥
गौरः कामी खुट छ्को मदनमद भरश्चंदनालिप्तदेहः पुष्पाणां कंदुहस्तो विरचीति
चतुरः कामदूतः सदासौ ।४। इति टछ्कः ।७। गांधारो देवपूर्वे स्वनलगतिगतिः स
त्रिकः पूर्णरूपो नैतर्यंचकास्ति प्रथमगतिरिघोरत्न सिंहासनस्थः । इंद्राद्यैः सं
यमानो रसपतिरसिकश्चंदनालिप्तदेहः शुभ्रं वस्त्रं दधानः करधृतकुसुमः स
र्वेभूषाभियुक्तः ५ इति देवगांधारः ।८। गौडी मल्ले प्रजाता तापपरि रहितो वामि
म ध्वांतपूर्णो वीरः शृंगारनिष्ठो वरशुकरचिभा मूसली कस्य मित्रं ॥ पन्नास्यः

१९ पद्मनेत्रः सिततरवसनः कंठमालादिभूष्यः सायंकाले सभायां प्रकटति चतुरो माल
वो रागराजः ६ इति मालवः ॥१॥ गुंडक्री मिलनो तो रसपति सहितो न्यादिमध्यांतकोपः
कौसुंभी केसराणां विमलजलकणैश्चित्रितः श्वेतवासाः । काश्मीरस्योर्ध्वपुंड्रः सुर
भितसुतनुः कंठकंजाक्षमालस्तांबूलास्योदिनांते हरिभजनपरः शोभते शुद्धगौ
डः ७ इति शुद्धगौडः ॥१०॥ बंगालांतश्च कर्णाट इति रिरहितो रादिमध्यांतकोयं
गौडीसन्मिलभूतः कमलकरतले पुष्पमुष्टिं दधानः । गौरांगः शुक्लवासाः कट
कमुकुटके यूरकांचीकाव्यः कौसुंभ्युष्णीषधारी परिजनसहितो याति पूर्वाह्ण
काले । ८ । इति कर्णाटबंगालः ॥११॥ इति श्री रागपरी वारः ॥४॥ ईशानस्यास्ति
तस्त्रिगतिगनिरिधः सन्निपूर्णः सुधीरो रक्तांगः कंजनेत्रः सिततरवसनः कं १९

मालादिकाद्यः। पाणौरवङ्गः प्रतापी स्मितवचनपरः स्निग्धगंभीरनादः संध्या
यां राजमार्गे शरदिहयगतीराजतेशुद्धनाटः॥१॥ इतिशुद्धनाटः॥१॥ सौजेश्रीराग
मेले नव गिरिरचितासादिमध्यांतिकायाश्रीखंडपंकचोली कुसुमसुवसनंसंदधा
नाम्रगाक्षी। ओष्ठेपंषद्धं गवाक्ये : प्रियमुपहसतीमालवःश्रीःसुतन्वीचक्रा
वकौषैश्चपलकरतराभ्राम्यतीसासदैव १० इतिमालवश्री॥२॥ गांधाराद्यंतमध्या
गुणगतिरिनिगाधैयतो दूर्गेतियौतांबूलास्यांजकाक्षी कनकमणिमयेर्भूषणै
र्भूषितांगी। नारारण्यंगलग्ना कुसुमसुकबरी कंचुकीचित्रवस्त्राहेशाक्षी राजकन्या
प्रतिदिनमुषसिप्रेक्षती मल्लुयुद्धं॥११॥ इतिदेशाक्षी॥३॥ गौरीश्रीकोमलांगीक
जमुकुलकुचाचित्रकूर्पासवस्त्रा सर्वांगेभूषणाढ्याम्रदुतरवचना शोकपर्वीप्रगल्भा।

ये लावल्लेकमेलाधिकविधुगतिमासत्रिकावापहीना देवक्री देवकन्यावकुचलुरतराराजतेहोत्स
यामे ॥ इति देवक्री ॥४॥ मुग्धा गोरी विचित्रांबरतनुरचितासर्वशृंगारयुक्ता माद्यंतांशादि
धावाङ्क्किगतिगतिरिधावन्निगत्यंतगाच ॥ भ्रूरेखाचापधात्रीमृगशिशुनयनातीव्रनेत्रा
तवाणा भर्त्तुर्गेहं सखीभिः सहकिल मधुमाधध्मुषसंप्रयांती १२ इति मधुमाधवी ॥५॥
चंडद्विस्त्रिर्गता स्युर्गिरि सुनयनूह स्निग्धनेत्रा प्रगल्भा श्यामा भीरात्रिषड्गा मृदुव
चनपरा मूर्छि वेणीं दधाना ॥ मृदंगी नीलवस्त्रा मृदुगलविलसत्कुमालिश्च कर्णेता
टंकाद्या हिसायं रत्नपतिनिनदे रासहंडैरमंती १४ इत्याभीरी ॥६॥ श्रीरागस्यैवमेला
द्विश्च विधुर्गीतिकः साद्रिमध्यांत कौसौशामांगः पीतवासा विरचिततिलकः कुंकुमैसौलमध्ये ॥

कंठे रत्ने कामालोलो ललितसुमुरली वाद्यमानस्त्रिभंगी शृंगारी भाति सायं कुसुमहा
रहितः श्रीजिजावंगरागः ।१५। इति जिजावंगः ।७। गौरस्तारुण्यपूर्णः करधृतकुलि
शः संभृतानंगरूपः कंठे मौक्तियमालः परिजनसहितः सर्वकिर्मीरवस्त्रः । शृंगाद्यः
सुकामी मृदुवचनपरः षड्जमध्यादिकांतः प्रीतेः कांतेः केदारमेले दिनपतिविरतौ भा
ति सालंगनाटः ।१६ इति सालंगनाटः ।।८।। शृंगारी पीतवस्त्रः कटकमुकुटसिंहास
नछत्रयुक्तो गौरांगः श्रीकुसेनी सुहृत्प्रसिमदकः पूर्यवागीश्वरीष्टः ।। त्रिस्त्रिघ्नेकरस्थ
ताः स्युः सरिरधगनयः केकिकंठाभको सौन्याद्यं ताश्री रिधोवा विलसतिर्द्विसां
तेपि कर्णाटरागः ।७७ इति कर्णाटः ।९। कर्णाटस्यप्रमेले प्रकटितसुतनुस्साजिमध्यां
तषड्जः कंठे हारः सरत्नः सितवसनरुचिः पाटलोष्णीषधारी । गौरांगोरक्तनेत्रः ४ संह

रागमाळा

२१ चर बहुभिवी रश्रृंगार वान्य: छायानाटो दिनांते प्रहसति पथिकान्पुष्पसहो द्र हस्त:॥१५

इति छायानाट:॥१०॥ संपूर्णो हू गीती रिस्वनलगतिनि ग: सग्रहन्या सकांत्रा: श्रृंगारी

यौवनाढ्य: स्मितपरवदन: कंदुसहंद्र हस्त:॥ गोरस्तांबूल वक्त्र: कुसुमश्चार सुहद्र त्क

वस्त्र: प्रतापी चेत: सिमंतिनी नामनुसरति हमीरा द्रिनाटो हि सायं ॥१९॥ इति हमीरनाट:॥

स्त्री ११॥ इति शुद्धनाटपरीवार:॥५॥ मुग्धैसंगतो हू गीतिरिग धनय: पूर्णसाधंतमध्यार

ढ्राणी वक्त्रजात:॥ शिखिकुलनटिनी नर्त्तकोभूषणाढ्य:॥ श्यामांग: पीतवस्त्र: करधृत

चपलाकांतिरवक्त्रोरयावान्प्राश्वरद्धोलेन्टणांत्रां प्रकटयति सदा नद्दनारायणोयम्॥

२०॥ इति नद्दनारायण:॥ २१॥ धिकुलां धिकुलां धिकुलामिति मृदु मुरजं वाद्यमानास्तुत २०

न्वीश्रृंगाराद्या सुगौरी कमलवसनकिमी र कूर्पासयुक्ता॥ औदावेलावलीयो षसि

द्विजमधुमाधव्युत्रोषस्वरस्छा चाद्यंतांशारिधावारसपरदसुतासकुरायी सहायी ॥२१॥
इति वेळावळी ॥२॥ कांबोजीमोहनीयाह्निगतिगनिरिधासत्रिकाद्यानिमावागौरी तांबू
लवक्त्रा कुसुमजवसनं कंचुकीं चादधाना। कस्तूरी बिंदुमाला कनकमणिमयैर्भूष
णैर्भूषितांगी कर्णाद्यांध्रीसखीभ्यां मुष स्मितविलसती किन्नरी वाद्यहस्ता २२ इति
कांबोजी ॥३॥ धाद्यंतांशागासपायानयनगुणगती चात्र धांत्यौ रिगौस्तः कस्तूरी बिं
दुभालामृगशिशुनयनाचंद्रवक्त्रा सुतन्वी। सावेरी कंठहस्ता सुवर्णाबरवसना
पीतकूर्पासयुक्ता श्यामवर्णा वरगजगमना सस्मिता सायमेति ॥२३॥ इति
सावेरी ॥४॥ तन्वी श्यामा मृगाक्षी वरकमलमुखी पीतवस्त्रं दधाना प्रोद्भासन्मत्ति
वेणी द्विजवरगमना कंचुकीं कर्बुरांच। वक्त्रेषद्धास्ययुक्ता हरिशिरसर चिता चामरै

वर्ज्यमाना सावेरी मेलयुक्ता धुपसितु सुहवी सत्रिका पूर्णरूपा २४ इति सुहवी ।५। सावेरी
मेलरक्ता स्वरसकलयुक्ता सत्रिका स्वैरिणी या चित्रं वस्त्रं दधाना कठिनकुचतटे कंचुकी
मेचकीव ॥ गौरांगी पंकजाक्षी हिमकरवदना दाडिमीबीज दंता सायं शृंगार पूर्णा मदन
सहचरी याति सौराष्ट्रिका सा २५ इति सौराष्ट्री ॥६॥ सावेरीमेलजातः सपपरिरिहितो
धग्रहन्यासकांशाः श्यामः पीतांबरो या मदनपरितः कंठमालादिकाद्यः । विद्युन्मे
घाति गर्जै रुदित शिखिगणान् नर्त्तयन्की र्णपक्षान् चारामी जन्म मित्रो ध्युषस्सिमल
हरो भाति मल्लारि राग ॥ २६ इति मल्लारि ॥७॥ संस्थो मल्लारि मेले स्वरसकलयुतो धे
वतांश ग्रहांत्यः श्यामांगः शंखमुक्तावलिरचितमलो भस्मभालो किरातः । रंभाप
त्रैर्वमौलौ धरति कटितटे बर्हिणां बर्हिजालं भक्तैः शांभो ः प्रभातस्तु करघारधन्व २२

नाज्जतेगौंडरागः२७ इतिगौंडः।८। सव्येदंडं त्रिशूलं खपरकरतले शुभ्रवस्त्रं दधानो
भस्मांगोरक्तनेत्रो विमलसुजटिलो द्वीपिचर्मोपविष्टः। नासाग्रेन्यस्तदृष्टिर्गिरि
राजपमना वेष्टितः शिष्यवर्गैः केदारो वारिपोस्ति त्रिविधनिसुहवी मेलजातो निशीथे।
इति केदारः।९। गौरो रक्तांबरो सौ गुरुजलवरश्री पीकंठः सुरूपी शृंगारीय स्व
र्पके विरचितसुतनु [redacted] भीलभस्मैककुंडः। नस्वारं तत्प्रियो मु
दितसुग्राम कवान् शंकराभ्ररणाख्यः प्रातः सार्धंतमध्यः प्रचरति मधुमाधव्यशेष
स्वरस्छः।२९। [redacted] इतिशंकराभरणः।१०। गौरः सुश्वेतपु वस्त्रः सुरभिलसुतनु
र्हस्ततांबूलधारी कामी पुष्पेषुधन्वी विरहिजनमनो वेधकः सत्रिकाद्यः।चंपाजाती

रागमाळा

सुयूथीविरचितमुकुटः कंठमल्लीमाभाला: सोयंकेदारमेळेजनिरूपविलसद्योवि
हादिगौडः स्यात् २० इतिबिहागडः॥ इतिनटनारायणपरीवाराः॥६॥ अनंतारागाः
संत्यन्येनानादेशजनाश्रिताः॥ एतेषामुपरागाः स्युरुक्तांतांतेचतद्विदैः॥३१॥
इतिरागलक्षणाणि॥ शके१६८५ सुभानुसंवत्सरे दक्षिणायने आषाढशुद्ध
सप्तमीरवाविदं लिखितं जगन्नाथात्मज शंकभट्टेन गौतमगोत्रिणे तिस्रे
येरागमाळापुस्तकम्॥ छ॥ छ॥ श्रीसांबसदाशिवोजयति॥ श्रीगंगा
धरोजयति॥ छ॥ श्रीरस्तु॥ छ॥ छ॥

२४

रागमालापुस्तकावसानपत्रमिदम्

२४

[OrderDescription]
,CREATED=30.12.19 10:55
,TRANSFERRED=2019/12/30 at 11:03:07
,PAGES=48
,TYPE=STD
,NAME=S0002410
,Book Name=M-2432-RAGMALARAMBH PATRAM
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF

FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF

FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF

FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF

FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,